संस्कृतवार्ता:

दिनाङ्क :- 29.04.2025

प्रात: - 06:55

प्रधानमन्त्री/युग्म-सम्मेलनम्

प्रधानमन्त्री नरेन्द्र-मोदी अद्य नवदिल्ल्यां भारत-मण्डये युग्म-सम्मेलने सहभागं करिष्यति। एतत् प्रथमं तादृशं महत्त्वपूर्णं नीतिगतं सम्मेलनम् अस्ति, यत्र प्रशासनं, शैक्षणिक-क्षेत्रं, व्यापार-जगत्, नवाचार-पारिस्थितिकी-तन्त्र-सम्बद्धा: श्रेष्ठा: वरिष्ठा: च जना: सहभागं करिष्यन्ति। भारतस्य नवाचार-यात्रायाम् एतत् सम्मेलनं महत्त्वपूर्णां भूमिकां निर्वक्ष्यति इति आकल्प्यते।

प्रधानमन्त्री/रक्षामन्त्री/मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी रक्षामन्त्रिणा राजनाथसिंहेन सह गतदिने नवदिल्ल्यां स्वनिवासस्थाने उपवेशनं कृतवान्। प्रायः चत्वारिंशन्निमेष-पर्यन्तं प्रचलिते अस्मिन् उपवेशने पहलगाम-आतङ्क्याक्रमणम् आलक्ष्य कार्याचरणेषु चर्चाभवत् ।

भारतम्/योद्धृविमानम्

षड्विंशति-सङ्ख्यकानां राफेल्-इत्येतेषां योद्धृविमानानां क्रयणार्थं फ्रांस्-देशेन सह रक्षासन्धिपत्रम् भारतेन हस्ताक्षरै: प्रमाणीकृतम्। रक्षामन्त्रालयस्य फ्रांस-सर्वकारस्य च अधिकारिणाम् उपस्थितौ नवदिल्ल्याम् एतस्मिन् अन्तस्सर्वकारीय-रक्षासन्धिपत्रे रक्षामन्त्रिणा राजनाथसिंहेन फ्रांसदेशस्य सशस्त्रबलमन्त्रिणा सेबेस्टियन-लेकॉर्नू इत्यनेन च नवदिल्ल्यां हस्ताक्षराणि कृतानि।

षड्विंशति-सङ्ख्यकेषु राफेल-मरीन्-जेट्-इत्येतेषु विमानेषु द्वाविंशति: एकासनयुक्तानि चत्वारि च युगलासनयुक्तानि भविष्यन्ति। एतानि भारतीय-नौसेनायाः आवश्यकतानुगुणानि परिकल्पितानि निर्मितानि च भविष्यन्ति। राफ़ेल्-मरीन्-जेट्स्-इत्यस्य समावेशनेन नौसेनायाः शक्तिः प्रवर्धिता।

एतानि योद्धृविमानानि आई.एन्.एस्-विक्रमादित्य- आई.एन्.एस्-विक्रान्त-इत्यादिषु विमानवाहकेषु नियोजितानि भविष्यन्ति। राफ़ेल्-विमानम् उन्नत-शस्त्र-व्यवस्थया सुसज्जितं

भविष्यति। ध्यानास्पदम् अस्ति यत् एतेषां राफेल्-योद्धृविमानानाम् आपूर्तिः त्रिंशदधिक-द्वि-सहस्र-तमाब्दं यत् भविष्यति।

पद्मपुरस्कारः

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः गतदिने नवदिल्ल्यां राष्ट्रपतिभवने प्रथमे नागरिकालङ्करण-समारोहे एकसप्तति-पद्मपुरस्कारान् प्राददात्। अस्मिन् वर्षे गणतन्त्रदिवसस्य पूर्वसन्ध्यायां प्रशासनेन पद्मपुरस्कारेभ्यः समुद्घोषिम् आसीत्। अत्र चत्वारि पद्मविभूषणानि दश पद्म-भूषणानि सप्तपञ्चाशत् पद्मश्री-सम्मानानि च ह्यः राष्ट्रपतिना वितरितानि।

ऋतुविभागः

भारतीयर्तु-विभागेन अद्य नगालैण्ड-मणिपुर-मिजोरम-त्रिपुरा-असम-ओडिशा-मेघालयेषु प्रबल-वृष्टेः पूर्वानुमानः कृतः अस्ति।

क्रिकेट्/महिला:

महिलानाम् एकदिवसीयान्ताराष्ट्रिय-त्रिकोणीय-क्रिकेट्-स्पर्धा-मालिकायां कोलम्बो-नगरे अद्य भारतीय-महिला-वृन्दं दक्षिणाफ्रीका-दलं सम्मुखी करिष्यति।

क्रिकेट्

इण्डियन्-प्रीमियर्-लीग्-क्रिकेट्-स्पर्धा-मालिकायां गतरात्रौ जयपुरे सवाई-मानसिंह-क्रीडाङ्गणे आयोजिते द्वन्द्वे वैभव-सूर्यवंशि-यशस्वी-जायसवालयोः श्रेष्ठ-प्रदर्शन-कारणात् राजस्थान-रॉयल्स्-दलेन गुजरात-टायटंस्-दलम् अष्टाभिः क्रीडकैः पराजितम्।

अद्य नवदिल्ल्यां सायङ्काले सार्धसप्त-वादने डेल्ही-कैपिटल्स्-दलं कोलकाता-नाइट्-राइडर्स्-दलेन स्पर्धिष्यते।